*Metres with 16 Syllables in a quarter*

(अष्टि)

(1) चित्र

Def. चित्रसंज्ञमीरितं रजौ रजौ रगौ च वृत्तम् ।
Sch. G. र, ज, र, ज, र, ग (8. 8. or 4. 4. 4. 4).
Ex. विद्रुमारुणाधरौष्ठशोभिवेणुवाद्यहृष्ट-
बल्लवीजनाङ्गसंगजातपुग्धकण्टकाङ्ग ।
त्वां सदैव वासुदेव पुण्यलभ्यपाद देव
वन्यपुष्पचित्रकेश संस्मरामि गोपवेश ॥

(2) पञ्चचामर

Def. प्रमाणिकापदद्वयं वदन्ति पञ्चचामरम् ।
or जरौ जरौ ततो जगौ च पञ्चचामरं वदेत् ।
Sch. G. ज, र, ज, र, ज, ग (8. 8. or 4. 4. 4. 4.)
Ex. सुरद्रुमूलमण्डपे विचित्ररत्ननिर्मिते
लसद्वितानभूषिते सलीलविभ्रमालसम् ।
सुराङ्गनाभवल्लवीकरप्रपञ्चचामर-
स्फुरत्समीरवीजितं सदाच्युतं भजामि तम् ॥

(3) वाणिनी

Def. नजभजरैर्यदा भवति वाणिनी गयुक्तैः ।
Sch. G. न, ज, भ, ज, र, ग.
Ex. स्फुरतु ममानने‌ऽद्य ननु वाणि नीतिरम्यं
तवचरणप्रसादपरिपाकतः कवित्वम् ।
भवजलराशिपारकरणक्षमं मुकुन्दं
सततमहं स्तवैः स्वरचितैः स्तवानि नित्यम् ॥

---

*Metres with 17 Syllables in a quarter*

(अत्यष्टि)

(1) चित्रलेखा

(Also called अतिशायिनी).

Def. ससजा भजगा गु दिक्स्वरैर्भवति चित्रलेखा
Sch. G. स, स, ज, भ, ज, ग, ग (10. 7).
Ex. इति धौतपुरन्ध्रिमत्सरान् सरसि मज्जनेन
श्रियमाप्तवतो‌ऽतिशायिनीमपमलाङ्गभासः ।
अवलोक्य तदैव यादवानपरवारिराशेः
शिशिरेतररोचिषाप्यपां ततिषु मङ्क्तुमीषे ॥ Śi. 8. 71.

(2) नर्दटक

Def. यदि भवतो नजौ भजजला गुरु नर्दटकम् ।
Sch. G. न, ज, भ, ज, ज, ल, ग (8. 9).
Ex. तरुणतमालनीलबहुलोन्नमदम्बुधराः
शिशिरसमीरणावधूतनूतनवारिकणाः ।
कथमवलोकयेयमधुना हरिहेतिमती-
र्मदकलनीलकण्ठकलहैर्मुखराः ककुभः ॥
Mal. 9. 18; see 5. 31.

(3) पृथ्वी

Def. जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः ।
Sch. G. ज, स, ज, स, य, ल, ग (8. 9).
Ex. इतः स्वपिति केशवः कुलमितस्तदीयद्विषा-
मितश्च शरणार्थिनः शिखरिणां गणाः शेरते ।
इतो‌ऽपि बडवानलः सह समस्तसंवर्तकै-
रहो विततमूर्जितं भरसहं च सिन्धोर्वपुः ॥ Bh. 2. 76.

(4) मन्दाक्रान्ता

Def. मन्दाक्रान्ताम्बुधिरसनगैर्मो भनौ तौ गयुग्मम् ।
Sch. G. म, भ, न, त, त, ग, ग (4. 6. 7).
Ex. गोपी भर्तुर्विरहविधुरा काचिदिन्दीवराक्षी
उन्मत्तेव स्खलितकबरी निःश्वसन्ती विशालम् ।
अत्रैवास्ते मुररिपुरिति भ्रान्तिदूतीसहाया
त्यक्त्वा गेहं झटिति यमुनामञ्जुकुञ्जं जगाम ॥
Pad. D. 1.

(The whole of the Meghadūta is written in this metre).

(5) वंशपत्रपतित

Def. दिङ्मुनिवंशपत्रपतितं भरनभनलगैः ।
Sch. G. भ, र, न, भ, न, ल, ग (10. 7).
Ex. दर्पणनिर्मलासु पतिते घनतिमिरमुषि
ज्योतिषि रौप्यभित्तिषु पुरः प्रतिफलति मुहुः ।
व्रीडमसंमुखो‌ऽपि रमणैरपहृतवसनाः
काञ्चनकन्दरासु तरुणीरिह नयति रविः ॥
Śi. 4. 67.

(6) शिखरिणी

Def. रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी
Sch. G. य, म, न, स, भ, ल, ग (6. 11).
Ex. दिगन्ते श्रूयन्ते मदमलिनगण्डाः करटिनः
करिण्यः कारुण्यास्पदमसमशीलाः खलु मृगाः ।
इदानीं लोके‌ऽस्मिन्ननुपमशिखानां पुनरयं
नखानां पाण्डित्यं प्रकटयतु कस्मिन् मृगपतिः ॥
Bv. 1. 2.

(7) हरिणी

Def. नसमरसला गः षड्वेदैर्हयैर्हरिणी मता ।
Sch. G. न, स, म, र, स, ल, ग (6. 4. 7).
Ex. सुतनु हृदयात्प्रत्यादेशव्यलीकमपैतु ते
किमपि मनसः संमोहो मे तदा बलवानभूत् ।
प्रबलतमसामेवंप्रायाः शुभेषु हि वृत्तयः
स्रजमपि शिरस्यन्धः क्षिप्तां धुनोत्यहिशङ्कया ॥
Ś. 7. 24.

---

*Metres with 18 Syllables in a quarter*

(धृति)

(1) कुसुमितलतावेल्लिता

Def. स्याद्भूतर्त्वश्वैः कुसुमितलतावेल्लिता म्तौ नयौ यौ
Sch. G. म, त, न, य, य, य (5. 6. 7).
Ex. क्रीडत्कालिन्दीललितलहरीवारिभिर्दाक्षिणात्यैः
वातैः खेलद्भिः कुसुमितलतावेल्लिता मन्दमन्दम्
भृङ्गालीगीतैः किसलयकरोल्लासितैर्लास्यलक्ष्मीं
तन्वाना चेतो रभसतरलं चक्रपाणेश्चकार ॥